# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्यः** | **प्रश्नपत्रम् – ५** | **गुणाः - ५०** |
| **विषयः – सर्वदर्शनम्** | **सत्रम्-२** | **समयः – २:०० तः ४:००** |
| **दिनाङ्कः – १७/०७/२०२१** | **सन्दर्भग्रन्थः – सर्वदर्शनसङ्ग्रहः (नकुलीशपाशुपत-शैव-प्रत्यभिज्ञादर्शनानि)** | |

सूचना – (i) निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्च प्रश्ना विधेयाः।

(ii) प्रत्येकं प्रश्नस्य अङ्काः समानाः सन्ति। (१०)

प्रश्नः – १ अधोलिखितेषु प्रश्नेषु द्वयोः प्रश्नयोः व्याख्यात्मकम् उत्तरं लिख्यताम् ।

(१) पाशुपतसूत्रस्य व्याख्यां लिखत।

(२) नकुलीशपाशुपतदर्शनानुसारं निरपेक्षस्य ईश्वरस्य कारणतां व्याख्यात।

(३) नकुलीशपाशुपतदर्शनानुसारं दुःखान्तं प्रतिपादयत।

प्रश्नः – २ ईश्वरज्ञानात् एव मोक्षः इति नकुलीशपाशुपतदर्शनानुसारं प्रतिपादयत।

प्रश्नः – ३ कार्यकारणयोगानां निरूपणं नकुलीशपाशुपतदर्शनानुसारं लिखत।

प्रश्नः – ४ शैवागमसिद्धान्तानुसारं पदार्थत्रयं निरूपयत।

प्रश्नः – ५ प्रत्यभिज्ञादर्शनस्य स्वरूपं प्रतिपाद्य तस्य साहित्यविषये एकं निबन्धं लिखत।

प्रश्नः – ६ अधोलिखितेषु प्रश्नेषु द्वयोः प्रश्नयोः व्याख्यात्मकम् उत्तरं लिख्यताम् ।

(१) शैवदर्शनानुसारं 'पशु'पदार्थं व्याख्यात।

(२) शैवदर्शनानुसारं विज्ञानाकलजीवस्य भेदद्वयं प्रतिपादयत।

(३) प्रत्यभिज्ञादर्शनानुसारं ज्ञानशक्तिं व्याख्यात।

प्रश्नः – ७ प्रत्यभिज्ञादर्शनानुसारं संसारोत्पत्तिं निबध्नीत।

प्रश्नः – ८ नकुलीशपाशुपतदर्शनस्य विषये एकं निबन्धं लिखत।

प्रश्नः – ९ भारतीयदर्शनानां संक्षिप्तं परिचयं निबध्नीत।

प्रश्नः – १० प्रत्यभिज्ञादर्शनस्य विषये एकं निबन्धं लिखत।

प्रश्नः – ११ अधोनिर्दिष्टेषु केषाञ्चित् दश प्रश्नानाम् अतिलघूत्तरं यच्छत ।

(१) को नाम मलः?

(२) दीक्षाकारि पञ्चकं किम् अस्ति?।

(३) दुःखं कतिविधम्? किञ्च तत्?

(४) एकापि क्रियाशक्तिः कतिविधा उपचर्यते?

(५) किं नाम कार्यम्?

(६) को नाम विधिः?

(७) सर्वदर्शनसंग्रहः केन लिखितः?

(८) शैवदर्शने पतिपदेन कः अभिहितः?

(९) अद्वैतवेदान्ते आत्मा विभुः उत अणुः?

(१०) शैवदर्शने पशुपदेन कः अभिहितः?

(११) पाशः कतिविधः?

(१२) अभिनवगुप्ताचार्यः कस्य दर्शनस्य प्रसिद्धः आचार्यः?

(१३) प्रत्यभिज्ञादर्शने जगतः कारणं किम् अस्ति?

(१४) आस्तिकदर्शनानि कति सन्ति?

(१५) नास्तिकदर्शनशिरोमणिः कः?

***